दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लद्वितीया
श्रावण 29 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-295 | 1 | अगस्त 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारतस्य स्वतन्त्रता-दिवसस्य सम्मानार्थम् अमरीका-देशस्य अनेकैः राज्यैः 'अगस्त-पञ्चदश'-दिनाङ्कः 'भारत-दिवसः' इति रूपेण उद्घोषितः

3 लोककलाकारः डॉ. जोगेन्द्रहाब्बी संगीत-नाटक-अकादमी-पुरस्कारेण सम्मानितः

8 प्रेरिका कथा लघ्वी माता, महान् स्वप्नः

## प्रावृट्-सत्रे द्वादश-विधेयकानि अनुमोदितानि, अनिश्चितकालाय स्थगिता लोकसभा - राज्यसभा च



संसद-सदनद्वयस्य उपवेशनम् अनिश्चित कालाय स्थगितम् । प्रावृट्-सत्रे द्वादश-विधेयकानि पारितानि; विपक्षाणाम् कोलाहलेन लोकसभायाः कार्यसाधकता केवलम् एकोनविंशति-प्रतिशतम् एवावशिष्टा।
संसदः उभे सदने अनिश्चितकालाय स्थगिते। गतमासस्य विंशतिदिनाङ्के आरब्धस्य संसदः प्रावृट्सत्रम् पञ्चविंशतिदिनेषु आहत्य एकोनविंशतिः उपवेशनानन्तरं समाप्तम् । प्रावृट्सत्रे राष्ट्रियमहत्त्वयुतं समेत्य अनेकानि विधेयकानि पारितानि। एतेषु लोकपरीक्षा-अनुचितसाधननिवारण-संशोधन विधेयकम्, विंशतिः षड्विंशतिः, राष्ट्रियसम्मान-अपमान-निवारण संशोधनविधेयकम् न्यायाधिकरण-परिष्कार-विधेयकम् करविषयकानां तथा अन्येषां विधीनां संशोधनविधेयकम्, राष्ट्रियसहकारिविकासनिगम-संशोधन विधेयकम् अथ केरल-नामपरिवर्तन-विधेयकम्, विंशतिः षड्विंशतिः इत्येतानि विधेयकानि सम्मिलितानि सन्ति। संसदा वैदेशिक-अंशदान-विनियमन संशोधन विधेयकम्, विंशतिः षड्विंशतिः इत्यपि परीक्षणाय संयुक्तसंसदीयसमित्यै प्रेषितम् यद्यपि सत्रावधौ नीट्-प्रश्नपत्रस्य अनधिकृतप्रकाशनम् आलक्ष्य विरोधप्रदर्शनं कुर्वतां छात्राणां विरुद्ध कथितारक्षक-कार्यम्, तथा अयोध्याराममन्दिरस्य दानराशौ कथितानियमितता इत्यादयः विषयान् आधृत्य पुनःपुनः व्यवधानानि अपि अभवन् छात्रसम्बद्धेषु विषयेषु विस्तृतचर्चायै प्रशासनेन पुनःपुनः आश्वासनान्यपि दत्तानि, तथापि विपक्षेण स्वविरोधः निरन्तरं प्रदर्शितः अथ सदनस्य कार्याचरणं बाधितम् । समापनभाषणे राज्यसभायाः सभापतिः सी. पी. राधाकृष्णन सदने वारं वारं जायमानेषु व्यवधानेषु चिन्तां प्रकटितवान् सः उक्तवान् यत् सदने सदस्येभ्यः स्वमतं प्रकटयितुं पर्याप्तः अवसरः उपलब्धः आसीत् ।
परन्तु सदस्याः जनानां स्वरं स्थापयितुं उपलब्धानाम् अवसराणां पूर्णतया उपयोगं न कृतवन्तः। श्रीराधाकृष्णन संसूचितवान यत सदनं केवलं सप्तत्रिंशत् होराः एकोनपञ्चाशत् निमेषाः यावत् अचलत् येन सदनस्य कार्यक्षमता एकं सप्त दशांशोत्तर नवत्रिंशत् प्रतिशतं यावत् आसीत् ।

### विपक्षं संसदः चर्चाभ्यः पलायते इति आरोपितवान् किरेनरिजिजूः

केन्द्रीयसंसदीयकार्य-मन्त्री किरेनरिजिजूः विपक्षं संसदः चर्चाभ्यः पलायते इति आरोपितवान्, यद्यपि प्रशासनं चर्चायै सज्जम् आसीत् सः उक्तवान् यत् विपक्षिसांसदानाम आचरणं लोकतन्त्राय, विशेषतः संसदीयलोकतन्त्राय, उचितं नास्ति । नवदिल्ल्यां वार्ताहरसम्मेलनं सम्बोधयन् श्रीरिजिजूः उक्तवान् यत् संसद् चर्चा-विचारविनिमय-विधिनिर्माणकार्याणां कृते अस्ति, किन्तु निरन्तर जायमानेभ्यः कोलाहल-विरोधप्रदर्शनेभ्यश्च सदनस्य कार्य प्रभावितम् अभवत श्रीरिजिजूः अवदत यत् प्रावृट्सत्रावधौ द्वादशविधेयकानि पारितानि, किन्तु उभयोः सदनयोः केवलम् एकस्मिन् विधेयके चर्चा अभवत् । अस्मिन सत्रे लोकसभायां सदनस्य कार्यक्षमता एकोनविंशतिः प्रतिशतं यावत् राज्यसभायां च नवत्रिंशत् प्रतिशतं यावदेव आसीत् । संसदा 'खनिज विकासः नियमः च (संशोधन) विधेयकम 2026 पारितम् अनेन खनन-क्षेत्रम् अधिकं कार्य-दक्षम तथा च निवेशकानाम् अनुकूलं भविष्यति।
संसदा 'खनिज-विकासः नियमः च संशोधन विधेयकम् विंशतिः षड्विंशतिः' इति पारितम् । राज्यसभा अपि अस्य विधेयकस्य पारणम् अकरोत् । एकादश-वादने सदनस्य उपवेशनान्तरं केन्द्रीय कृष्णांगार-खनिज-मन्त्री जी. किषन रेड्डी-इत्यनेन 'खनिज विकासः नियमः च अधिनियमस्य' अग्रिम संशोधनाय इदम् विधेयकम् उपस्थापितम् । अस्य विधेयकस्य मुख्यं उद्देश्यं भारतस्य खनन क्षेत्रम् अधिकं कार्यकुशलम्, निवेश-सुलभम् देशस्य उत्तरोत्तर वर्धमानानां महत्त्वपूर्ण-खनिजानाम् आवश्यकताः पूरयितुं पूर्णतः सक्षमं च विधातुम अस्ति। अनेन विधेयकेन केन्द्र-सर्वकारः एम.एम.डी.आर.-अधिनियमस्य निर्धारित मानदण्डैः युक्तानां खनिज-समृद्ध-भूमीनां नियन्त्रणं स्वकीये अधिकार-क्षेत्रे आनेतुम् इच्छति ।

## अद्यतनीयं सुभाषितम्

**पथि रोपति यः छायां,सर्वप्राण्युपकारिकाम्।**
**स स्वर्गं लभते विप्र!,सत्यमेतन्मयोदितम्॥**

अर्थात्- हे विप्र! जो मनुष्य रास्ते में सभी प्राणियों के उपकार के लिए छायादार वृक्ष लगाता है, वह स्वर्ग को प्राप्त करता है, यह पूर्ण सत्य है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## राष्ट्रपतिः द्रौपदीमुर्मूः कला-साधकेभ्यः प्रतिष्ठितं 'सङ्गीत-नाटक-अकादमी-सम्मानम्' प्रदत्तवती



राष्ट्रपतिपदासीना द्रौपदी मुर्मुः नवदेहल्यां आयोजिते विशेषे सम्मानसमारोहे विंशतिः चतुर्विंशतिः अथ विंशतिः पञ्चविंशतिः चेत्येतयोः वर्षयोः सङ्गीतनाटक-अकादमी इति संस्थायाः सर्वोच्चसम्मानं पुरस्कारान् च शताधिकेभ्यः कलाविद्भ्यः प्रदत्तवती। एते पुरस्काराः भारतस्य प्रदर्शनकलासु उत्कृष्टं निरन्तरं च योगदानम् अभिनन्दन्ति। एतेषु सङ्गीतं, नृत्यं, नाट्यं, लोककलाः, जनजातीयकलाः, पुत्तिकाकला, पारम्परिकनाट्यम् अथ अन्ये सम्बद्धाः कलाविधयः च सम्मिलिताः सन्ति । अस्मिन् अवसरे राष्ट्रपतिः अवदत् यत् पुरस्कारालंकृताः कलाकाराः आधुनिकभारतस्य प्रतिभायाः समर्पणस्य च प्रतिनिधयः सन्ति। चिताः सर्वोच्चसम्मान-प्राप्ताः पुरस्कारविजेतारश्च सम्पूर्णराष्ट्रस्य प्रतिनिधित्वं कुर्वन्ति तथा विभिन्नराज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च सम्बद्धाः सन्ति। अकादम्याः सर्वोच्चसम्मान-प्राप्तेभ्यः त्रिलक्षरूप्यकाणां पुरस्कारराशिः प्रदीयते, अकादमी-पुरस्कारप्राप्तेभ्यः च एकलक्षरूप्यकाणां पुरस्कारराशिः ताम्रपत्रम् अङ्गवस्त्रं च प्रदीयते।

# चीन-रूस-देशौ भारतस्य ब्रिक्स अध्यक्षतां प्रत्यभिनन्दताम्, स्वकीय-समर्थनं च पुनः प्राकट्यताम्

चीन-रूस-देशाभ्यां अस्मिन् वर्षे ब्रिक्स समूहस्य अध्यक्षतां कुर्वते भारतदेशाय स्वकीयं पूर्ण-समर्थनं प्रदत्तम्। नवदेहल्याम् आयोजितायां गोलमेज़-चर्चायां चीनस्य राजदूतः शू-फेइहोंगः अथ च रूसस्य प्रतिनिधिः रोमन बाबूश्किन इत्येतौ भागम् अगृह्णीताम् । ध्यातव्यं वर्त्तते यत् अस्मिन् वर्षे भारतस्य अध्यक्षतायाः मुख्य विषयाः सुदृढता, नवोन्मेषः, सहयोगः, सततता चेत्यादयः भविष्यन्ति।

# भारतस्य स्वतन्त्रता-दिवसस्य सम्मानार्थम् अमरीका-देशस्य अनेकैः राज्यैः 'अगस्त-पञ्चदश'-दिनाङ्कः 'भारत-दिवसः' इति रूपेण उद्घोषितः



अमरीका-देशस्य बहूनि राज्यानि अगस्त-मासस्य पञ्चदश-दिनाङ्कं इण्डिया-डे इति रूपेण आचरितुं विशेष-घोषणाः कृतवन्तः । अनेन भारतस्य स्वतन्त्रतायाः, समृद्ध-न्यासस्य विविधतायाः अथ च अमरीकी समाजे भारतीय-अमरीकी समुदायस्य वर्धमान-योगदानस्य उत्सवः आचर्यते। न्यूयार्क-न्यूजर्सी-राज्याणाम् अनन्तरम् डेलावेयर-राज्यम् अस्यां शृङ्खलायाम् नवीनतमं स्थानं भजते । डेलावेयर-राज्यस्य राज्यपालः मैथ्यू मायरः एतस्मिन् घोषणापत्रे हस्ताक्षरं कृत्वा राज्यस्य सर्वान् नागरिकान् उत्साहपूर्वकम् (भारत-दिवसम् आचरितुम् सोत्साहम् (आह्वानम् अकरोत् । पूर्वमेव न्यूयार्क-राज्यस्य राज्यपालः कैथी होचुल अथ न्यूजर्सी-राज्यस्य राज्यपालः मिकी शेरिल इत्येताभ्याम् अपि अगस्त-मासस्य पञ्चदश-दिनाङ्के इण्डिया-डे इत्याचरितुं घोषणाः विहिताः ।


# नागरिक-उड्डयन-मन्त्री के. राममोहन-नायडू विजयवाडा-वाराणस्योः मध्ये प्रत्यक्ष-विमान-सेवाम् आरब्धवान्



हिमसंस्कृतवार्ता। नागरिक-उड्डयन-मन्त्री के. राममोहन-नायडूः ह्यः विजयवाडा-वाराणस्योः मध्ये प्रत्यक्ष-विमान-सेवायाः शुभारम्भम् अकरोत्। सः अकथयत् यत् अनया नवया विमान-सेवया विजयवाडा-नगरस्य 'श्री कनक दुर्गा अम्मा' मन्दिरस्य वाराणस्याः 'बाबा काशी विश्वनाथ' धाम्नः च मध्ये तीर्थ-पर्यटनस्य प्रवर्धनम् भविष्यति।श्रीनायडूः सूचितवान् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना 'अल्लूरी सीताराम राजू भोगापुरम' विमानपत्तस्य (एयरपोर्ट) उद्घाटनानन्तरम् विजयवाडा-राजमहेन्द्री-कडप्पानगरेषु नवीनानां विमानपट्टन-टर्मिनल्-कार्याणि अपि शीघ्रमेव पूर्णानि भविष्यन्ति। अनया नवया विमान-सेवया द्वयोः प्रमुख-धार्मिक-नगरयोः मध्ये यात्रा अतीव सुगमा भविष्यति।

# अहिल्याबाई होल्कर महिलानां शिक्षायाः विधवापुनर्विवाहस्य च प्रोत्साहनद्वारा महिलानां सशक्तीकरणे सा अनन्यं योगदानं प्रदत्तवती- अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाहः समाजोद्धारिकायाः अहिल्याबाई होल्कर इत्यस्याः पुण्यतिथौ तस्यै श्रद्धाञ्जलिम् अर्पितवान् । सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे श्रीशाहः उक्तवान् यत् अहिल्याबाई होल्कर महिलानां शिक्षायाः विधवापुनर्विवाहस्य च प्रोत्साहनद्वारा महिलानां सशक्तीकरणे सा अनन्यं योगदानं प्रदत्तवती। सा लोककल्याणाय, न्यायाय, सुशासनाय च आदर्शं स्थापितवती। अस्मिन् अवसरे रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् अहिल्याबाई होल्कर जनकेन्द्रितशासनस्य, अद्भुतसाहसस्य, कुशल-प्रशासनस्य च असाधारणोदाहरणम् उपस्थापितवती।




श्रीसिंहः उक्तवान् यत् सा वञ्चितानां जनजातीय समुदायानां च आजीविकायै कल्याणाय च अनेकानि महत्त्वपूर्णानि पदक्षेपानि उत्थापितवती।

# कोलम्बिया-देशस्य राष्ट्रपतिना आर्थिक-आपत्कालः घोषितः



कोलम्बिया-देशस्य राष्ट्रपतिना एबेलार्डो डि ला एस्प्रियेला इत्यमुना भूकम्पेन सञ्जातस्य विनाशस्य अनन्तरं आपदुद्धरणकार्याणि युद्धस्तरे चालयितुं आर्थिक-आपत्कालः घोषितः। आधिकारिक विवरणानुसारम् अस्मात् विनाशयुक्त-भूकम्पकारणात् न्यूनतिन्यूनं पञ्चषष्ट्यधिक-द्विशतं जनाः मृत्युमुपगताः चतुर्नवत्यधिक-चतुश्शतोत्तर-त्रिसहस्रं जनाः व्रणिताः अभवन् । राष्ट्रपतिः एतां घटनाम् विशाल-संकटत्वेन घोषयन् अवदत् यत् सर्वकारः पीडित-कुटुम्बानाम्, व्यवसायानाम् समुदायानां च साहायतायै अथ च पुनर्निर्माण-कार्याणि तीव्रयितुं सन्नद्धः । अस्मिन् सप्ताहे सोमवासरे सप्त-दशांश-चतुर्तीव्रतामानेन समागतेन भूकम्पेन प्रायः चतुःपञ्चाशतसहस्रजनाः प्रभाविताः । साम्प्रतं षड्नवत्यधिक-चतुश्शतं जनाः विलुप्ताः । अपरतः, भारतस्य विदेशमन्त्री डा० एस० जयशङ्करः भूकम्पेन जातां जनहानिं विनाशं चालक्ष्य गभीरं दुःखं प्रकटितवान् । स्वकीये सन्देशे मन्त्री जयशङ्करः शोकसन्तप्त-कुटुम्बान् प्रति संवेदनां व्यक्तवान् अथ च अवदत् यत् भारतम् अस्मिन् सङ्कटे सर्वविध-साहाय्यं दातुम् पूर्णतया सज्जमस्ति ।

# स्वास्थ्य तथा परिवार कल्याण मन्त्रालय द्वारा 'एनीमिया मुक्त भारतम्'इति अभियाने द्विदिवसीया राष्ट्रीया कार्यशाला आयोजिता




केन्द्रीयस्वास्थ्यपरिवारकल्याणमन्त्रालयेन नवीदिल्लीनगरे 'एनीमिया मुक्तभारत' (AMB) अभियानस्य विषये द्विदिनात्मका राष्ट्रियकार्यशाला आयोजिता। आरब्धायां कार्यशालायां सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यः च १६० तः अधिकाः प्रतिभागिनः उपस्थिताः आसन्।
मन्त्रालयेन उक्तं यत् कार्यशालायाः प्राथमिकं उद्देश्यं संशोधितस्य एएमबी-अभियानस्य कार्यान्वयनं सुदृढं कर्तुं तथा च रणनीत्याः अनुवादः भवति-यत्र सप्तलाभार्थिनः, सप्तहस्तक्षेपाः, सप्त संस्थागततन्त्राणि च सन्ति-नीतितः देशे सर्वत्र प्रभावी भूस्तरीयकार्याणि प्रति। अस्मिन् अवसरे वदन्त्याः केन्द्रीयस्वास्थ्यसचिवः पुण्यसलिलाश्रीवास्तवः स्वास्थ्यकार्यक्रमेषु अधिकसमन्वयस्य, रक्ताल्पतारोगस्य व्यापकरूपेण निवारणाय निकटमन्त्रालयसहकार्यस्य च आह्वानं कृतवान्। सा उत्तमसमन्वितहस्तक्षेपैः, परीक्षणप्रयत्नैः, सेवाप्रदानमञ्चैः च रक्ताल्पता नियन्त्रणे आनेतुं आवश्यकतायां बलं दत्तवती । सा जीवनचक्रदृष्टिकोणद्वारा युवावयोवर्गं अपि आच्छादयन् जनजागरूकतां वर्धयितुं प्रयत्नानाम् विस्तारं च कृतवती। कार्यशालायाः एकः प्रमुखः आकर्षणः आसीत् 'एनीमिया मुक्त भारत' अभियानस्य अनुप्रयोगस्य पोर्टलस्य च शुभारम्भः। अस्याः उपक्रमस्य उद्देश्यं लाभार्थीस्तरस्य रक्ताल्पतायां निरीक्षणं, अनुवर्तनं, प्रबन्धनं च सुदृढं कर्तुं वर्तते । अङ्कीयमञ्चः परीक्षणद्वारा चिह्नितानां लाभार्थीनां निरीक्षणे सहायतार्थं विनिर्मितः अस्ति, येन उपचारस्य अनुपालनस्य च निरीक्षणं सक्षमं भवति, परिचर्यायाः निरन्तरता सुनिश्चिता भवति, तथा च यावत् समस्यायाः समाधानं न भवति तावत् अनुवर्तनस्य सुविधा भवति।

# लोककलाकारः डॉ. जोगेन्द्रहाब्बी संगीत-नाटक-अकादमी-पुरस्कारेण सम्मानितः




**हिमसंस्कृतवार्ता**-अन्तर्राष्ट्रीयख्यातिप्राप्तः लोककलाकारः डॉ. जोगेन्द्रहाब्बी लोकनृत्यस्य क्षेत्रे स्वकीयस्य उल्लेखनीयस्य योगदानस्य कृते संगीत-नाटक- अकादमी-पुरस्कारेण अलंकृतः अस्ति। अयं पुरस्कारः महामहिमराष्ट्रपतिना द्रौपदीमुर्मू- महोदयया स्वकरकमलाभ्यां प्रदत्तः।पद्मश्री-सम्मानेन सम्मानितः वरिष्ठसाहित्यकारः लोकसंस्कृतेः मर्मज्ञश्च विद्यानन्दसरैककः, उस्ताद- बिस्मिल्लाहखाँ-पुरस्कारेण च सम्मानितः लोककलाकारः डागोपलहाब्बी च संयुक्तवक्तव्ये उक्तवन्तौ यत् भारतसर्वकारस्य संस्कृति- मन्त्रालयस्य संगीत-नाटक-अकादम्या विभिन्नेषु कलाक्षेत्रेषु उल्लेखनीययोगदानं दत्तवद्भ्यः देशस्य विभूतिभ्यः महामहिमराष्ट्रपतिना द्रौपदीमुर्मू-महोदयया स्वकरकमलाभ्यां संगीत- नाटक-अकादमी- पुरस्कारः प्रदत्तः।
पद्मश्री-सम्मानेन सम्मानितः वरिष्ठसाहित्यकारः लोकसंस्कृतेः मर्मज्ञश्च विद्यानन्दसरैककः तथा उस्ताद-बिस्मिल्लाहखाँ-पुरस्कारेण सम्मानितः लोककलाकारः डॉ. गोपलहाब्बी च संयुक्तवक्तव्ये उक्तवान् यत् भारतसर्वकारस्य संस्कृतिमन्त्रालयस्य संगीत- नाटक- अकादम्या विभिन्नेषु कलाक्षेत्रेषु उल्लेखनीय- योगदानं दत्तवतीभ्यः देशस्य विभूतिभ्यः महामहिमराष्ट्रपतिना द्रौपदीमुर्मू- महोदयया स्वकरकमलाभ्यां संगीत- नाटक- अकादमी-पुरस्कारः प्रदत्तः।

**नवदेहल्याः विज्ञानभवने आयोजितस्य भव्यस्य अलंकरणसमारोहस्य शुभारम्भः राष्ट्रपतिना द्रौपदीमुर्मू-महोदयया दीपप्रज्वालनेन कृतः।**

उल्लेखनीयं यत् डॉ. हाब्बी-महोदयस्य नेतृत्वे लोककलाकारैः सिरमौरी-नाटीसहिताः अनेकाः पारम्परिकाः विलुप्तप्रायाः लोककलाः विगतेषु पञ्चत्रिंशद्वर्षेषु मिश्रितगीतैः इलेक्ट्रॉनिकवाद्यैश्च दूरं स्थित्वा, लोकवाद्यानां, लोकवस्त्राणां, लोकगीतानां लोकनृत्यानां च शुद्धतां संरक्ष्य देश-विदेशेषु सहस्राधिकेषु मञ्चेषु सिरमौरी-हाटी-संस्कृतेः विशिष्टः परिचयः स्थापितः।सिरमौरी-नाट्याः वैश्विकपरिचयं प्रदातुं दिशि तेषां सफलप्रयत्नानाम् अन्तर्राष्ट्रीय-अभिलेखेषु उपलब्धीनां रूपेणापि मान्यता प्राप्ता अस्ति। तेषाम् अस्याः दीर्घकालीनस्य सांस्कृतिकसाधनायाः परिणामस्वरूपं विदेशस्य एकेन विश्वविद्यालयेन तेषां कृते डॉक्टरेट इत्यस्य मानदोपाधिरपि प्रदत्ता अस्ति।पद्मश्री विद्यानन्दसरैककः, गोपालहाब्बी तथा हिमाचलप्रदेशस्य बाह्यराज्यानां च शतशः लोककलाकाराः अस्यै गौरवपूर्णायै ऐतिहासिकायै उपलब्ध्यै डॉ. हाब्बी-महोदयाय अभिनन्दनानि समर्पितवन्तः। ते विश्वासं व्यक्तवन्तः यत् अयं सम्मानः हिमाचलस्य लोककलानां संरक्षणाय तथा नवसन्ततिं स्वकीयैः सांस्कृतिकमूलैः सह संयोजयितुं क्रियमाणेभ्यः प्रयत्नेभ्यः नूतनाम् ऊर्जां प्रदास्यति।

# १९ वर्षेषु १९१ देशानां भ्रमणम्, अधुना द्विचक्रिकया भारत-भ्रमणाय प्रस्थितः देवनाथः




**हिमसंस्कृतवार्ताः- धर्मशाला।** पश्चिमबङ्गस्य सुन्दरवन-क्षेत्रात् आगतः सोमनदेवनाथः सम्प्रति साइकिलयानेन भारतभ्रमणं करोति। तस्य अस्य यात्रायाः उद्देश्यः 'पुनर्मिलन भारतम्', 'एकं वृक्षम् एकं जीवनम्' तथा 'भारतीयाः युवजनाः क्रीडा च' इत्यादीन् सन्देशान् सम्पूर्णदेशे प्रसारयितुम् अस्ति। सः अष्टाविंशतिः राज्येषु पञ्चसु च केन्द्रशासितप्रदेशेषु यात्रा पूर्णं कर्तुं लक्ष्यं कृत्वा अग्रे गच्छति। देवनाथस्य अनुसारं सः अद्यावधि पश्चिमबङ्गात् झारखण्डं, बिहारं, उत्तरप्रदेशं, पञ्जाबं तथा जम्मू-कश्मीरं च अतिक्रम्य हिमाचलप्रदेशं प्राप्तवान् अस्ति। तस्य कथनमस्ति यत् अग्रेऽपि द्विचक्रिकया देशस्य विभिन्नराज्येषु केन्द्रशासितप्रदेशेषु च यात्रा निरन्तरं भविष्यति।
देवनाथेन कथितं यत् सः २७ मई २००४ दिनाङ्के विश्वभ्रमणम् आरब्धवान्। प्रायः १९ वर्षेषु तेन १९१ देशानां सप्तमहाद्वीपानां च भ्रमणं कृतम्। अस्मिन् काले तेन ३६ राष्ट्राध्यक्षैः ७२ प्रधानमन्त्रिभिश्च सह मेलनं कृतम्। स्वकीयासु यात्रासु सः विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु तथा विभिन्नेषु संस्थानेषु गत्वा युवभिः सह संवादं कुर्वन् भारतीयसंस्कृतेः सामाजिकजागरूकतायाः च सम्बद्धान् सन्देशान् प्रसारितवान्। तेन उक्तं यत् २००४ तः २००७ पर्यन्तम् एशियादेशानां, २००७ तः २००९ पर्यन्तं यूरोपस्य, २००९तः २०१२ पर्यन्तं यूरोपस्य अन्येषां भागानां, २०१२तः २०१५पर्यन्तम् आफ्रिकादेशस्य, २०१५तः २०१७ पर्यन्तं दक्षिण-अमेरिकायाः अण्टार्कटिकायाश्च यात्रा कृता। ततः परं तेन मध्य-अमेरिका, कैरिबियन-प्रदेशः, अमेरिका, कनाडा इत्येतैः सह रूस, साइबेरिया, मङ्गोलिया तथा चीनदेशस्य च यात्रा कृता। कोविड-विभिषीकायाः समये चीनदेशे अवरुद्धस्य अनुभवमपि तेन स्पष्टीकृतम्। रोगस्य संगरोधनस्य च मध्ये तेन अतीव कठिनताः अनुभूताः। अनन्तरं सः दक्षिणकोरियादेशं प्राप्तवान् तथा न्यूजीलैण्डदेशेऽपि संगरोधनस्य कारणेन प्रायः एकवर्षपर्यन्तं स्थितवान्। ततः परम् ऑस्ट्रेलिया तथा दक्षिण-पूर्व-एशियादेशानां यात्रा कुर्वन् १० दिसम्बर २०२१ दिनाङ्के भारतं प्रत्यागतवान्। अधुना देवनाथः पुनरपि साइकिलयात्रायां प्रवृत्तः अस्ति। भारतस्य विभिन्नान् भागान् परस्परं संयोजयितुं तथा युवजनान् पर्यावरणस्य, एकतायाः, क्रीडायाश्च प्रति जागरूकान् कर्तुं सः सन्देशं प्रसारयति। तस्य कथनमस्ति यत् अस्यां यात्रायां स्थानीयैः सामाजिकसङ्घटनैः युवभिश्च सह मिलित्वा कार्यं कर्तुमपि प्रयत्नः क्रियते।

# चिकित्सामहाविद्यालयेषु ३,००० कोटिरूप्यकैः परिवर्तयिष्यन्ते प्राचीनानि उपकरणानि, मन्त्रिणा सभायां दत्ताः निर्देशाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे स्वास्थ्यसुविधानां आधुनिकीकरणाय १५ तः २० वर्षाणि पुरातनानि चिकित्सोपकरणानि चरणबद्धरूपेण परिवर्त्यन्ते। एतदर्थं राज्यसर्वकारेण प्रायः ३,००० कोटिरूप्यकाणि व्ययीकर्तुं निश्चितानि सन्ति। स्वास्थ्यमन्त्रिणा डॉ. (कर्नल) धनीरामशाण्डिलेन मेडिकल- सर्विसेज- कॉर्पोरेशन- संस्थायै नवीनयन्त्राणां औषधानां च क्रयप्रक्रियायां शीघ्रतां कर्तुं निर्देशाः दत्ताः।स्वास्थ्यमन्त्रिणा गुरुवासरे हिमाचलप्रदेश-मेडिकल सर्विसेज कॉर्पोरेशन लिमिटेडसंस्थायाः निदेशक- मण्डलस्य सप्तमायाः सभायाः अध्यक्षता कृता। तेन उक्तं यत् प्रदेशस्य प्रत्येकस्मै जनाय गृहस्य समीपे आधुनिकाः गुणवत्तापूर्णाश्च स्वास्थ्यसेवाः उपलब्धाः कारयितुम् राज्यसर्वकारस्य उद्देश्यम् अस्ति। अस्य लक्ष्यस्य प्राप्तौ मेडिकल सर्विसेज कॉर्पोरेशन-संस्थायाः महत्त्वपूर्णा भूमिका अस्ति।कॉर्पोरेशन-संस्था प्रदेशस्य क्रय-अभिकरणरूपेण चिकित्सा- महाविद्यालयेभ्यः, सर्वकारीय- स्वास्थ्यसंस्थाभ्यः औषधानां, शल्यक्रियासम्बद्धानां चिकित्सोपभोग्यसामग्रीणां, चिकित्सोपकरणानां यन्त्राणां च क्रयं वितरणं च करोति। तेन उक्तं यत् पूर्वं प्रयुज्यमाना क्रयप्रक्रिया अधिकं समयं गृह्णाति स्म, व्ययश्च अपि वर्धते स्म।स्वास्थ्यसचिवेन आशीषसिंहमारेण सभायां सूचितं यत् प्रदेशे स्वास्थ्यसेवाः सुदृढाः क्रियमाणाः सन्ति। अत्याधुनिकोपकरणानां क्रयणे स्थापनायां च शीघ्रता क्रियते। पीईटी-स्कैन, उच्च- विभेदन- रङ्गीन-डॉप्लर, पूर्ण-कक्ष-डिजिटल-रेडियोग्राफी, डिजिटल-मेमोग्राफी, आधुनिक- लेप्रोस्कोपिक- शल्यक्रिया-समुच्चय, बाइप्लेन-डीएसए-यन्त्र, रक्त- विभाजक-एककानाम् उच्चस्तरीय- इकोकार्डियोग्राफी-यन्त्राणां क्रयः क्रियमाणः अस्ति।
कैथ-लैब, ईसीजी-यन्त्राणि, ट्रैक-बेस्ड इंटीग्रेटेड टोटल लैब ऑटोमेशन सिस्टम, अस्थिमज्जा-प्रत्यारोपणार्थम् एफेरेसिस-इकाई, निरोग-चिकित्सालयानां उपकरणानि, निःशुल्क- उपनेत्राणां व्यवस्थासम्बद्धेषु प्रस्तावेषु अपि सभायां चर्चा कृता। सभायां वित्तस्य विशेषसचिवः विजयवर्धनः, प्रबन्धनिदेशकश्च अजयकुमारयादवः उपस्थितौ आस्ताम्।




## HP WEATHER UPDATE- प्रदेशे १३६ मार्गाः, २४२ पेयजलयोजनाः बाधिताः, विद्युत्पातेन २०० मेष-अजाः मृताः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे ऋतोः स्थितिः निरन्तरं परिवर्तते। गुरुवासरे काङ्ग्ड़ा-जनपदे प्रातःकालात् मध्याह्नपर्यन्तं तीव्रः सूर्यप्रकाशः आसीत्, किन्तु मध्याह्नानन्तरं धर्मशालायां तस्य समीपवर्तिक्षेत्रेषु च धारासारवृष्टिः अभवत्। ऋतुविज्ञानविभागेन शुक्रवासरे सिरमौर-मण्डी-जनपदयोः अतिवृष्टेः नारङ्गवर्णीयः सचेतना (ऑरेंज अलर्ट) प्रसारिता अस्ति, यदा काङ्ग्ड़ा, चम्बा, ऊना, बिलासपुर- जनपदानां कृते पीतवर्णीयः सचेतना (येलो अलर्ट) प्रसारिता अस्ति। प्रदेशे अगस्तमासस्य १७ दिनाङ्कपर्यन्तं ऋतुः प्रतिकूलः स्थास्यति इति सम्भावना अस्ति। वर्षया भू-स्खलनेन च प्रदेशे अद्यापि जनजीवनं पूर्णतया सामान्यं न अभवत्। राज्ये १३६ मार्गाः, २४२ पेयजलयोजनाः तथा नव विद्युत्-परिवर्तकयन्त्राणि प्रभावितानि सन्ति।

### विभिन्नविभागानां दलानि सेवापुनर्स्थापनकार्ये संलग्नानि

विभिन्नविभागानां दलानि सेवापुनर्स्थापनकार्ये संलग्नानि सन्ति। राजधानी-शिमलायां गुरुवासरे मध्याह्नपर्यन्तं ऋतुः स्वच्छः आसीत्, सायंकाले मेघाः नीहारः च व्याप्तौ अभवताम्। धर्मशालायां द्विदिनं ऋतोः स्वच्छतानन्तरं तापमानस्य वृद्धिः अभिलिखिता। मध्याह्नानन्तरं जाता तीव्रवृष्टिः जनान् उष्ण-आर्द्रतायुक्तात् तापात् संबलं दत्तवती। मण्डी-जनपदे आदिनं मेघाः आच्छादिताः आसन् तथा च अनेकेषु क्षेत्रेषु मन्दं वृष्टिपातः अभवत्। कुल्लू-जनपदे ऋतुः स्वच्छः आसीत्, किन्तु सैंजस्य देहुरीधार-ग्रामपञ्चायतस्य अपर-शफाड़ी-ग्रामे भूमेः स्खलनेन एकं गृहम् अपतत्। ऊनायां आदिनं ऋतुः स्वच्छः आसीत्, तथापि आर्द्रतायुक्तेन उष्णतया जनाः पीडिताः अभवन्। चम्बाजनपदे बैरागढ़-साचपास- किलाड़- मार्गः २४ घण्टानन्तरं गुरुवासरे प्रातः यातायाताय पुनः उद्घाटितः।

### विद्युत्पातेन २०० मेष-अजानां मृत्युः-

किन्नौरस्य रूपी-उपत्यकायां बुधवासरे रात्रौ ११ वादने विद्युत्पातस्य व्याप्तौ आगत्य प्रायः २०० मेष-अजानां मृत्युः अभवत्। उपत्यकायाः राज्यश्री-कण्डे इति स्थाने घटितया अनया दुर्घटनया मेषपालकाय लक्षरूप्यकाणां क्षतिः अभवत्। सौभाग्यवशात् घटनायाः समये मेषपालकः वितानस्य अन्तः आसीत्। घटनायाः सूचना प्राप्तमात्रेण गुरुवासरे पशुपालन-विभागस्य राजस्व-विभागस्य च अधिकारी घटनास्थलं प्रति प्रस्थितवन्तः।

# 'गृहे गृहे संस्कृतम्' योजनायाः अगस्तमासीय-चतुर्थचक्रस्य कक्षाणाम् उद्घाटनम्



### "संस्कृतभाषायाः गृहे गृहे प्रसारे 'गृहे गृहे संस्कृतम्' योजनायाः विशिष्टं योगदानम्"- योजनासमन्वयकः

हिमसंस्कृतवार्ताः- लखनऊ, १३ अगस्त २०२६। उत्तरप्रदेशशासनेन स्वायत्तशासिना उत्तरप्रदेश-संस्कृत- संस्थानेन सञ्चाल्यमानायाः 'गृहे गृहे संस्कृतम्' योजनायाः अन्तर्गतं अगस्तमासस्य चतुर्थचक्रस्य संस्कृतशिक्षणकक्षाणाम् उद्घाटनं गुरुवासरे सम्पन्नम्। अस्मिन् कार्यक्रमे प्रदेशस्य प्रायः द्विचत्वारिंशत् जनपदेषु स्थितानां चतुःपञ्चाशत् शिक्षणकेन्द्राणां सहभागिता आसीत्।
कार्यक्रमः संस्थानस्य कार्यकारी-अध्यक्षस्य मनीष चौहानमहोदयस्य, निदेशकस्य प्रेमेन्द्र कुमार गुप्तमहोदयस्य च निर्देशनानुसारम् आयोजितः। योजनाप्रभारी भगवानसिंहचौहानमहोदयः अवदत्- "'गृहे गृहे संस्कृतम्' योजनायाः माध्यमेन वयं सर्वे मिलित्वा संस्कृतभाषां गृहे गृहे व्यवहारभाषां कर्तुं प्रयत्नशीलाः स्मः। अस्मिन् कार्ये प्रशिक्षकाणां महत्त्वपूर्णं योगदानम् अस्ति। ते पूर्णसमर्पणेन परिश्रमेण च स्वदायित्वं निर्वहन्ति।"
योजनासमन्वयकः डॉ. अनिलगौतममहोदयः सर्वेषां प्रशिक्षकाणाम् उपस्थितानां च धन्यवादं ज्ञापयन् अवदत् यत् संस्कृतभाषायाः केवलम् अध्ययनं न, अपि तु तस्याः व्यवहारः अपि आवश्यकः अस्ति। 'गृहे गृहे संस्कृतम्' योजना संस्कृतभाषायाः संरक्षणे, संवर्धने, प्रचार-प्रसारे च निरन्तरं कार्यं कुर्वती अस्ति। योजनायां कार्यरताः सर्वे प्रशिक्षकाः संस्कृतभाषायाः संवर्धने प्रचार-प्रसारे च महत्त्वपूर्णां भूमिकां निर्वहन्ति। ते अवदन् यत् संस्कृतशिक्षणं केवलं व्याकरणपर्यन्तं सीमितं न भवेत्, अपि तु संवादैः, कथाभिः, गीतैः, अभिनयेन, क्रीडाभिः, प्रौद्योगिकीयमाध्यमैः च सम्बद्धं करणीयम्।
कार्यक्रमस्य सञ्चालनं योजनाप्रशिक्षकेण गरुडमिश्रेण कृतम्। सरस्वतीवन्दनां प्रशिक्षिका पूनमसिंह अकरोत्। संस्थानस्य गीतिकां अञ्जुमिश्रा प्रस्तुतवती। अतिथीनां स्वागतं योजनाप्रशिक्षिका नीलाक्षी श्रीवास्तव अकरोत्। प्रशिक्षकेण मुकेश पाठकेन शान्तिमन्त्रस्य पाठेन कार्यक्रमस्य समापनं कृतम्।

### जनपदे जौनपुरे अपि संस्कृतकक्षाणाम् शुभारम्भः-

जनपदस्य जौनपुरस्य प्राथमिकविद्यालये छावनी-कालीचाबाद इत्यत्रापि 'गृहे गृहे संस्कृतम्' योजनायाः अन्तर्गतं संस्कृतशिक्षणकक्षाणां शुभारम्भः अभवत्। अस्मिन्नवसरे प्रधानाध्यापिका बिन्दुसिंह, सहायकाध्यापिका बिन्दु पाण्डे, वन्दना यादव, शिक्षामित्रः बृजेशकुमार यादवः, शिक्षामित्रा पूनमसिंह च छात्राभिः सह उपस्थिताः आसन्।
सहायकाध्यापिका बिन्दुपाण्डेयः अवदत्- "अस्माकं विद्यालये आयोजिते अस्मिन् शिविरे संस्थानेन प्रेषिता शिक्षिका पूनमसिंह बालिकाभ्यः सरल-सहजरीत्या संस्कृतसम्भाषणं पाठयिष्यति। सा क्रीडाभिः, गीतैः, अभिनयेन, कथाभिः च संस्कृतभाषाशिक्षणं रोचकं करिष्यति। एतादृशैः गतिविधिमूलकैः शिक्षणोपक्रमैः छात्राणां संस्कृतभाषायां रुचिः वर्धिष्यते तथा ते सहजतया संस्कृतेन व्यवहारं कर्तुं समर्थाः भविष्यन्ति।"



# सांस्कृतिक प्रस्तुतिभिः जागृतायाः देशभक्तेः उत्साहः

हिमसंस्कृतवार्ताः- हरिद्वारम्, अशीतितमं स्वातन्त्र्यदिवसम् उपलक्ष्य बीएचईएल- हरिद्वारे छात्राणां कृते देशभक्तिपूर्णः सांस्कृतिकः कार्यक्रमः आयोजितः। कार्यक्रमे विभिन्नविद्यालयानां बालकलाकारैः गीतैः, नृत्यैः नाटिकाभिश्च देशप्रेम्णः राष्ट्रस्य प्रति उत्तरदायित्वस्य च सन्देशः प्रदत्तः।कार्यक्रमस्य शुभारम्भः मुख्यातिथिना बीएचईएल- हरिद्वार- लेडीज-क्लबदलस्य संरक्षिकया नन्दनकुमार्या, विशिष्टातिथिना कार्यपालक- निदेशकेन रञ्जनकुमारेण दीपप्रज्वलनेन कृतः। अस्मिन् अवसरे नन्दनकुमार्या उक्तं यत् सांस्कृतिकगतिविधयः बालकानां व्यक्तित्वविकासे महत्त्वपूर्णां भूमिकां निर्वहन्ति। एताभिः बालकेषु देशस्य समाजस्य च प्रति उत्तरदायित्वस्य भावना अपि विकसिताः भवति। सा उक्तवती यत् राष्ट्रप्रेम केवलं शब्देषु सीमितं न भवेत्, अपि तु अस्माकं व्यवहारेषु कार्येषु च अपि तस्य प्रकटीकरणं भवेत्।
कार्यपालकनिदेशकः रञ्जनकुमारः स्वातन्त्र्यदिवसस्य शुभकामनाः प्रदाय बालकलाकाराणां प्रस्तुतयः प्रशंसितवान्। सः उक्तवान् यत् बालकलाकारैः स्वकलामाध्यमेन देशस्य प्रति प्रेम उत्साहश्च प्रभावशालिरूपेण प्रस्तुतौ। कार्यक्रमे बीएचईएल-उपनगरस्य बालमन्दिरस्य, विद्यामन्दिरस्य, डीपीएस-विद्यालयस्य, केन्द्रीयविद्यालयस्य, सरस्वती-शिशुमन्दिरस्य, गुरुनानक-एकेडमी-विद्यालयस्य, शिवडेल-विद्यालयस्य तथा सरस्वतीविद्यामन्दिरस्य बालकाः भागं गृहीतवन्तः। विद्यार्थिभिः देशभक्तिपूर्णगीतैः, नृत्यैः तथा नाटिकाभिः कार्यक्रमे विशेषं सौन्दर्यं समुत्पादितम्। कार्यक्रमस्य अवधौ बालकेषु विशेषः उत्साहः दृष्टः। प्रस्तुतिभिः स्वातन्त्र्यसङ्ग्रामस्य, राष्ट्रप्रेम्णः तथा देशस्य प्रति नागरिककर्तव्यानां च सन्देशः प्रदत्तः।
अस्मिन् अवसरे बीएचईएल-संस्थायाः महाप्रबन्धकाः, सीआईएसएफ-अधिकारीणः, लेडीज- क्लब इत्यस्य पदाधिकारिणः, विभिन्नविद्यालयानां प्रधानाचार्याः, शिक्षकाः, अभिभावकाः तथा माध्यमप्रतिनिधयः उपस्थिताः आसन्। कार्यक्रमस्य अन्ते अवरेण महाप्रबन्धकेन निखिलवर्मणा सर्वेषां अतिथीनां, प्रतिभागिनां उपस्थितजनानां च प्रति कृतज्ञता प्रकटिता।

# बालिका संस्कृतविद्यापीठे तीज-महोत्सवस्य भव्यम् आयोजनम्



**हिमसंस्कृतवार्ताः- दीपक शास्त्री, (हरियाणा)**
महिलानाम् उत्थानस्य स्वावलम्बनस्य च सन्देशः बालिका संस्कृतविद्यापीठे हरियाली- तीज-महोत्सवस्य भव्यं हर्षोल्लासपूर्णं च आयोजनम् अभवत्। अस्य कार्यक्रमस्य उद्देश्यं छात्राभ्यः भारतीयसंस्कृतेः, परम्पराणां लोकाचाराणां च परिचयं कारयितुं, नारी-सशक्तीकरणं महिला- स्वावलम्बनं च प्रोत्साहयितुम् आसीत्। अस्मिन् अवसरे छात्राः उत्साहपूर्वकं विविधप्रकारकाणि स्वनिर्मितानि व्यञ्जनानि अपाचयन्। छात्राभिः गोलगप्पाः, चाट्, नमकीनम्, सैण्डविच् इत्यादीनां स्वादिष्टव्यञ्जनानां विविधाः विक्रयस्थलिकाः स्थापिताः। छात्राभिः स्वहस्तेन व्यञ्जनानि निर्माय सृजनात्मकतायाः, पाककौशलस्य, आत्मनिर्भरतायाः उद्यमशीलतायाः च परिचयः प्रदत्तः। कार्यक्रमे बालिका संस्कृतविद्यापीठस्य प्राचार्या डॉ. सुमनशर्मा महोदयया महिलानाम् शिक्षा, सम्मानः, आत्मनिर्भरता, अधिकाराः तथा समाजे तासां महत्त्वपूर्णा भूमिका इत्यादिविषयेषु प्रेरणादायकं व्याख्यानं प्रदत्तम्। तया उक्तं यत् नारी समाजस्य विकासस्य प्रमुखा आधारशिला अस्ति तथा प्रत्येकां महिलां स्वावलम्बिनीं सशक्तां च कर्तुं समाजस्य दायित्वम् अस्ति। तथैव अत्रि चैरिटेबल फाउण्डेशनस्य शरद् अत्रिमहोदयेन महिलानाम् उत्थानं, कौशलविकासः, स्वावलम्बनम्, आत्मविश्वासः तथा आर्थिक-सशक्तीकरणम् इत्यादिविषयेषु सारगर्भितं प्रेरणादायकं च व्याख्यानं प्रदत्तम्। तेन महिलाः स्वप्रतिभायाः कौशलस्य च विकासं कृत्वा आत्मनिर्भराः भूत्वा समाजस्य प्रगतौ योगदानं दातुं प्रेरिताः। तीज-महोत्सवे छात्राभिः महिलाभिश्च मेहन्दी- अलंकरणम्, दोलाक्रीडा, लोकगीतानि, नृत्यं सांस्कृतिकप्रस्तुतयः च आनन्देन अनुभूताः। पारम्परिक- वेषभूषया सुसज्जिताः छात्राः भारतीयसंस्कृतेः मनोहरां झलकीं प्रस्तुतवत्यः। कार्यक्रमे वक्तारः अवदन् यत् नारी केवलं परिवारस्य आधारशिला एव न, अपितु समाजस्य राष्ट्रस्य च विकासस्य महत्त्वपूर्णा शक्तिः अस्ति। यदा महिलाः शिक्षिताः आत्मनिर्भराश्च भवन्ति, तदा सम्पूर्णः समाजः प्रगतिं करोति।
विद्यालयपरिवारेण अस्मिन् शुभावसरे सर्वाभ्यः छात्राभ्यः, शिक्षिकाभ्यः अतिथिभ्यश्च तीज-पर्वणः हार्दिकाः शुभकामनाः प्रदत्ताः। सम्पूर्णः कार्यक्रमः भारतीयसंस्कृतेः, नारीसम्मानस्य, महिला-सशक्तीकरणस्य, आत्मनिर्भरतायाः सामाजिक-उत्थानस्य च प्रेरणादायकं सन्देशं दत्त्वा सम्पन्नः अभवत्।

# पाटलिपुत्र-ग्रीनफील्ड-नगरोपान्तक्षेत्रे भूमेः क्रय-विक्रय-हस्तान्तरणेषु नास्ति कोऽपि प्रतिबन्धः
## पाटलिपुत्र-नगरोपान्तक्षेत्रस्य विकासेन सह जनहिताय सर्वकारस्य प्राथमिकता- नीतीशमिश्रः




**हिमसंस्कृतवार्ता राघवनाथझा पाटलिपुत्रम्।**
नगरविकास-आवासविभागस्य मन्त्री श्रीनीतीशमिश्रः प्रावोचत् यत् 'पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-टाउनशिप' (पटना) क्षेत्रे भूमेः क्रय-विक्रये हस्तान्तरणे च पूर्वं प्रवृत्तः प्रतिबन्धः अधुना निष्प्रभावः संवृत्तः। अस्य विषयस्य सूचना विभागेन पटनायाः समाहर्त्रे-सह-मण्डल-निबन्धकाय (District Registrar) आवश्यकरूपेण प्रेषिता अस्ति। श्रीनीतीशमिश्रः अकथयत् यत् माननीय-मुख्यमन्त्रिणः श्रीसम्राट्-चौधरि-महोदयस्य नेतृत्वे राज्ये विकासस्य गतिं तीव्रतरं कुर्वद्भिः एतदपि सुनिश्चितं क्रियते यत् विकासकार्याणां क्रमविकासे कस्यापि जनस्य हितं बाधितं न भवेत्। सर्वकारः विकासस्य जनहितस्य च मध्ये सन्तुलनं स्थापयित्वा सर्ववर्गस्य हितरक्षणाय प्रतिबद्धः अस्ति।
मन्त्री श्रीनीतीशमिश्रः व्यज्ञापयत् यत् पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-नगरोपान्तक्षेत्रस्य विकासयोजना-प्रारूपस्य प्रकाशनान्तरं विभागीय-अधिसूचना निर्गता। अस्याः अधिसूचनायाः माध्यमेन नगरोपान्तक्षेत्रस्य विशेषविभागे भूमेः क्रय-विक्रये हस्तान्तरणे च या पूर्वप्रतिबन्धाज्ञा आसीत्, सा निरस्ता कृता अस्ति।
सः स्पष्टमकरोत् यत् पाटलिपुत्र-ग्रीनफील्ड-सैटेलाइट-टाउनशिपस्य समग्रे क्षेत्रे, यस्मिन् 'कोर-क्षेत्रम्' अपि सम्मिलितम् अस्ति, भूमेः क्रय-विक्रये हस्तान्तरणे च अधुना कस्यापि प्रकारस्य प्रतिबन्धः प्रभावी नास्ति। अतः सम्बद्धक्षेत्रे भूमेः क्रय-विक्रयः हस्तान्तरणं च पूर्ववदेव कर्तुं शक्यते। मन्त्री अकथयत् यत् अनेन निर्णयेन अस्य क्षेत्रस्य भू-स्वामिनां सर्वसामान्यानां च मध्ये भूमेः क्रय-विक्रयं हस्तान्तरणं च प्रति या संशयात्मिका स्थितिः आसीत्, सा समाप्ता भविष्यति तथा च तेभ्यः आवश्यकं स्पष्टता-ज्ञानं प्राप्स्यते।

# हल्द्वानी शुद्धिकरण यज्ञमाधृत्य भाजपा- कांग्रेसपक्षौ परस्परं समक्षम्, आरोपेषु विधास्यते परिशीलनपरीक्षणम्




**हिमसंस्कृतवार्ताः- देहरादूनम्,**
हल्द्वान्याः रामलीलामैदान इत्यस्मिन् क्रीडांगणे कथितशुद्धीकरणयज्ञं प्रति उत्तराखण्डे राजनीतिकविवादः तीव्रतरः अभवत्। संसदः विषये उत्थापिते सति भारतीयजनतापक्षः भारतीय-राष्ट्रीयकाङ्ग्रेसश्च परस्परम् आरोपान् कृतवन्तौ। भारतीयजनतापक्षेण आयोजनस्य सह कस्यापि प्रकारस्य दलीयसम्बन्धः निराकृतः, अपरतः काङ्ग्रेसदलेन एतत् सामाजिकभेदभावेन दलितसम्मानेन च सम्बद्धं मन्यमानेन प्रकरणस्य निष्पक्षान्वेषणं कार्यवाहीं च कर्तुं आग्रहः कृतः। भारतीयजनतापक्षस्य पक्षतः केन्द्रीय राज्यमन्त्री अजय टम्टा, मन्त्रिणी रेखा आर्या, खजानदासश्च पृथक् पृथक् प्रतिक्रियासु अवदन् यत् रामलीलामैदाने आयोजितं हवनयज्ञादिकं दलस्य कार्यक्रमः नासीत्। भारतीयजनतापक्षस्य नेतृणां मते आयोजनस्य आयोजिकया संस्थयापि एतत् धार्मिककार्यक्रमरूपेण वर्णितम् अस्ति। तेषाम् आरोपः अस्ति यत् काङ्ग्रेसः अस्य घटनायाः राजनीतिकं जातीयं च स्वरूपं निर्माय प्रदेशस्य सामाजिकवातावरणं प्रभावितुं प्रयतते।
केन्द्रीय राज्यमन्त्री अजय टम्टा अवदत् यत् भारतीयजनतापक्षः सामाजिकविभाजनं वर्धयन्तीं कस्यामपि गतिविधिं समर्थयति न। सः दलस्य पक्षतः आयोजनस्य सह सम्बन्धाभावस्य पुनः उल्लेखं कृत्वा अवदत् यत् स्थानीयघटनां राजनीतिकलाभाय जातीयविवादस्य रूपं दातुं न उचितम्। सः एतदपि अवदत् यत् भारतीय-जनतापक्षस्य पूर्वराष्ट्रियाध्यक्षेण जे. पी. नड्डा इत्यनेन अस्मिन् विषये खरगेमहोदयस्य भावनाः आहताः इति प्रति खेदः व्यक्तः कृत्वा अन्वेषणस्य आश्वासनं दत्तम् अस्ति। रेखा आर्या खरगेमहोदयस्य आरोपान् निराकुर्वती अवदत् यत् घटनां प्रति संसदः देवभूमेः प्रतिमायाः हानिं जनयन्तीं वार्तां प्रस्तुता। सा दावां कृतवती यत् सम्बन्धितः धार्मिककार्यक्रमः न भारतीय- जनतापक्षेन न वा सर्वकारेण सह सम्बद्धः आसीत्। सा एतदपि अवदत् यत् आयोजने अनुसूचित- जातिसम्बद्धाः पश्चात्वर्गसम्बद्धाः च जनाः अपि सम्मिलिताः आसन्।
भारतीयजनतापक्षस्य नेत्या काङ्ग्रेसस्य उपरि राजनीतिकलाभाय घटनां जातीयविवादस्य रूपं दातुम् आरोपः कृतः। कैबिनेटमन्त्री खजानदासः अवदत् यत् शुद्धीकरणयज्ञं भारतीयजनतापक्षेन सह संयोजयितुं तथ्यहीनम् अस्ति। सः अवदत् यत् श्रीरामसेना- धर्मार्थसेवान्यासस्य पक्षतः कार्यक्रमः धार्मिक- कार्यक्रमरूपेण वर्णितः अस्ति।

# संस्कृतस्य वर्चस्वम्! इण्डिया टुडे-क्रमाङ्कने देशस्य शीर्ष-२५ विश्वविद्यालयेषु केन्द्रीय- संस्कृत- विश्वविद्यालयस्य स्थानम्

**हिमसंस्कृतवार्ताः- आचार्यः मनोज शैलः।**
देशस्य श्रेष्ठविश्वविद्यालयानां सर्वेक्षणे केन्द्रीय-संस्कृत- विश्वविद्यालयेन नूतनं कीर्तिमानं स्थापितम्। इण्डिया टुडे क्रमाङ्कनम्-२०२६ इत्यस्मिन् देशस्य शीर्ष-२५ विश्वविद्यालयेषु केन्द्रीय- संस्कृत-विश्वविद्यालयेन स्थानं प्राप्तम्। सी. एस. यू. इत्यनेन २३तमं स्थानम् अधिगतम्। देहल्याः शीर्षविश्वविद्यालयेषु चतुर्थं स्थानं प्राप्य संस्कृतस्य संस्कृतेश्च गौरवं वर्धितम्। संस्कृतं भारतीयज्ञानपरम्परां च आधुनिकशिक्षया, अनुसन्धानक्षेत्रेण नवाचारैश्च सह संयोजयितुं दिशि अग्रे गच्छता केन्द्रीयसंस्कृतविश्वविद्यालयेन, नवदेहलीस्थेन, राष्ट्रियस्तरे अन्यद् महत्त्वपूर्णा उपलब्धिः प्राप्ता अस्ति। इण्डिया टुडे- एमडीआरए- बेस्ट यूनिवर्सिटीज रैंकिङ्ग-२०२६ इत्यस्य टॉप जनरल (Govt.) यूनिवर्सिटीज इन इण्डिया इति श्रेण्यां केन्द्रीयसंस्कृतविश्वविद्यालयेन २३तमं स्थानम् अधिगतम्। विश्वविद्यालयेन गतवर्षस्य २४तमस्थानस्य तुलनायाम् अस्मिन् वर्षे एकपदम् उन्नतिं कृत्वा २३तमं स्थानं प्राप्तम्। विश्वविद्यालयस्य समग्राङ्कः १२४२.६ अभवत्। देहल्याः शीर्षविश्वविद्यालयानां सूच्याम् अपि सी.एस.यू. इत्यनेन स्वस्य सुदृढोपस्थितिं प्रदर्शयता चतुर्थं स्थानम् अधिगतम्।

**संस्कृतात् राष्ट्रियक्रमाङ्कनपर्यन्तं यात्रायाः नूतनं सोपानम्**
इण्डिया टुडेद्वारा प्रकाशितायां प्रतिष्ठितायां क्रमाङ्कनसूच्यां केन्द्रीयसंस्कृतविश्वविद्यालयस्य Top General (Govt.) Universities in India इति श्रेण्यां २३तमस्थाने स्थितिः अस्य तथ्यस्य संकेतः अस्ति यत् संस्कृतशिक्षा इदानीं केवलं पारम्परिकाध्ययनपर्यन्तं सीमिता नास्ति, अपितु आधुनिकोच्चशिक्षया, अनुसन्धानकार्येण, प्रौद्योगिक्या, नवाचारेण तथा जीविकोन्मुखशिक्षया सह अग्रे वर्धते। विश्वविद्यालयेन विगतेषु कतिपयेषु वर्षेषु संस्कृतस्य भारतीयज्ञानपरम्परया च सह आधुनिकविषयाणां संयोजनस्य दिशि अनेकाः महत्त्वपूर्णाः प्रयासाः कृताः सन्ति। कृत्रिमबुद्धिमत्ता, तथा Data Science, आयुर्वेदः, प्राविधिकशिक्षा, अङ्कीयसंसाधनानि, अनुसन्धानकार्यं तथा वैश्विकशैक्षणिकसहयोगः इत्यादिषु क्षेत्रेषु विश्वविद्यालयस्य सक्रियतया तस्य शैक्षणिकपरिचयः विस्तृतः जातः।




संस्कृतस्य वर्धमानवैश्विकप्रासङ्गिकतायाः परिचयं रेखाङ्कयन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडी इत्यनेन क्रमाङ्कने प्राप्ताम् उन्नतिं विश्वविद्यालयपरिवारस्य सामूहिकोपलब्धिः इति कथितम्। सः अवदत् यत् इण्डिया टुडे-क्रमाङ्कने २३तमं स्थानं प्राप्तिः अस्माकं कृते गौरवस्य विषयः अस्ति। एषा उपलब्धिः केवलं विश्वविद्यालयस्य न, अपि तु संस्कृतस्य भारतीयज्ञानपरम्परायाश्च वर्धमान-प्रासङ्गिकतायाः प्रमाणमपि अस्ति। वयं संस्कृतं आधुनिकसन्दर्भैः सह संयोजयित्वा अनुसन्धानम्, नवाचारं तथा प्राविधिकशिक्षां प्रति विशेषं ध्यानं दत्तवन्तः। विश्वविद्यालयस्य लक्ष्यं संस्कृतं एकविंशतितमशताब्द्याः आवश्यकताभिः सह संयोज्य ज्ञानस्य, अनुसन्धानस्य तथा जीविकायाः नूतनानाम् अवसराणां माध्यमरूपेण विकसितुं वर्तते। एतत् क्रमाङ्कनं विश्वविद्यालयं भविष्ये अधिकतरं श्रेष्ठप्रदर्शनं कर्तुं प्रेरयिष्यति।

विश्वविद्यालयस्य कुलसचिवः प्रो. आर. जी. मुरलीकृष्णः अवदत् यत् क्रमाङ्कने एकपदस्य उन्नतिः विश्वविद्यालयस्य आचार्याणां, शोधार्थिनां, विद्यार्थिनां, अधिकारिणां, कर्मचारिणां च सामूहिकप्रयासस्य परिणामः अस्ति। सः अवदत् यत् एषा उपलब्धिः संस्कृतशिक्षायाः गुणवत्तायाः तथा तस्याः समकालीनोपयोगितायाः राष्ट्रियस्तरे नूतनां प्रतिष्ठां प्रददाति। विश्वविद्यालयः भविष्ये एतस्मादपि श्रेष्ठं स्थानं प्राप्तुं प्रतिबद्धः अस्ति।

इण्डिया टुडे-क्रमाङ्कनम्-२०२६ इत्यस्मिन् केन्द्रीयसंस्कृतविश्वविद्यालयः Top General (Govt.) Universities in India इति श्रेण्यां २३तमस्थाने स्थितः, यदा तु देहल्याः शीर्षविश्वविद्यालयानां क्रमाङ्कने विश्वविद्यालयेन चतुर्थं स्थानम् अधिगतम्। गतवर्षस्य २४तमस्थानस्य तुलनायाम् अस्मिन् वर्षे एकपदस्य उन्नतिः विश्वविद्यालयस्य निरन्तरवर्धमानां शैक्षणिकप्रतिष्ठां दर्शयति। संस्कृतस्य परम्परातः आधुनिकप्रौद्योगिकीपर्यन्तं केन्द्रीय- संस्कृत-विश्वविद्यालयस्य एतद् प्रदर्शनं भारतीयज्ञानपरम्परायाः परिवर्तमानस्वरूपस्य तस्याः च नूतनराष्ट्रियपरिचयस्य कथा कथयति।

# "पटना-विश्वविद्यालय-अधिनियमस्य १९७६ रक्षणाय छात्र-शिक्षक-कर्मचारिणः एकीभवन्तु" - आइसा

१३ अगस्त २०२६, पाटलिपुत्रम् (पटना)
पाटलिपुत्रम्। सम्पूर्ण-बिहारराज्ये विश्वविद्यालयानां स्वायत्ततायां क्रियमाणस्य प्रहारस्य तथा च पटना-विश्वविद्यालय-अधिनियमस्य १९७६ समाप्ति-प्रस्तावस्य विरोधाय 'पटना-कॉलेज'-अल्पाहारगृहात् बहिः 'ऑल इण्डिया स्टूडेंट्स एसोसियेशन' (आइसा) इत्यस्य पटना-विश्वविद्यालय-शाखया छात्र-शिक्षक-कर्मचारिणां परिचर्चायाः आयोजनं कृतम्। अस्मिन् कार्यक्रमे पटना-कॉलेज तथा वाणिज्य-महाविद्यालयस्य विशालसंख्यायां छात्राः सहभागिनः अभवन्। कार्यक्रमस्य सञ्चालनम् 'आइसा' पटना-विश्वविद्यालयस्य सचिवया कॉमरेड-सबा-आफ़रीन-महोदयया कृतम्। सभां सम्बोध्य पटना-विश्वविद्यालय-कर्मचारिसङ्घस्य अध्यक्षेण सुबोध-महोदयेन उक्तं यत् पटना-विश्वविद्यालय-अधिनियमः १९७६ विश्वविद्यालयस्य स्वायत्ततायाः, लोकतान्त्रिक-स्वरूपस्य, अकादमिक-गरिमायाः च आधारशिला अस्ति। सः अकथयत् यत् यदि विश्वविद्यालयस्य नियन्त्रणं नौकरशाही-हस्तेषु समर्पितं भवेत्, तर्हि उच्चशिक्षायाः स्वतन्त्रतायां गम्भीरः आघातः भविष्यति। अस्मिन् सङ्ग्रामे विजयप्राप्तये सः छात्र-कर्मचारिणां एकतां निर्णायिकां परिगणय्य साझा-आन्दोलनस्य आह्वानम् अकरोत्। एआईसीसीटीयू-सङ्घस्य नेता तथा पटना-विश्वविद्यालयस्य पूर्ववर्ती छात्रः कॉमरेड-रणविजय-महोदयः अपि विश्वविद्यालयेषु वर्धमानस्य केन्द्रीकरणस्य विरोधे व्यापक-जनप्रतिरोधस्य आवश्यकतां प्रतिपादितवान्। अपरञ्च 'आइसा' नेतृभिः कॉमरेड-सबा-आफ़रीन, कॉमरेड-आदर्श, कॉमरेड-आशीष, कॉमरेड-अनुज, कॉमरेड-आज़ाद इत्याद्यैः छात्रान् सम्बोध्य प्रोक्तं यत् विश्वविद्यालयः कस्यापि सर्वकारीय-विभागस्य विस्तारः नास्ति, अपि तु एषः छात्राणां, शिक्षकाणां, कर्मचारिणां च साझा-लोकतान्त्रिक-संस्था अस्ति। अतः पटना-विश्वविद्यालयस्य स्वायत्ततायाः रक्षणस्य सङ्ग्रामः समग्र-बिहारस्य उच्चशिक्षायाः रक्षणस्य सङ्ग्रामः अस्ति। अस्मिन् कार्यक्रमे 'आइसा' पटना-विश्वविद्यालयस्य सचिवा कॉमरेड-सबा-आफ़रीन, उपाध्यक्षः कॉमरेड-आशीषः, पटना-कॉलेज-सचिवः कॉमरेड-आदर्शः, दरभंगा-हाउस-अध्यक्षः कॉमरेड-आज़ादः, तथा च सहयोगिनः मोनू, रोहन, अनुज, विवेक आनन्द सुन्दर, अमृता, शीनू, जुनैद इत्यादयः अनेके छात्र-कार्यकर्तारः उपस्थिताः आसन्। 'आइसा' पक्षतः घोषणामक्रियत यत् "एकम् अङ्गुलमपि पृष्ठतः न अपसरिष्यामः! पटना-विश्वविद्यालयस्य स्वायत्ततां संरक्ष्य एव स्थास्यामः!" इति सङ्कल्पेन सह 'सेव पटना यूनिवर्सिटी' (पटना-विश्वविद्यालय-रक्षण) अभियानं द्रुतगत्या व्यापकं करिष्यते।



# उर्वरक-बीज-कीटनाशकानां विकृतौ न सह्यते कापि अनियमितता, दोषियुक्तानां थोक-खुदरा-प्रतिष्ठानानां विरुद्धं भविष्यति कठोराचरणम्



- **उर्वरक-संस्थाभ्यः सह शीघ्रमेव भविष्यति उपवेशनम्; कृषकेभ्यः गुणवत्तापूर्ण-कृषि-सामग्रीणां प्रदायः सर्वकारस्य प्राथमिकता**

– विजयकुमारसिन्हा

पाटलिपुत्रम्। प्रेषकः राघव नाथ झा। माननीयः कृषि मन्त्री श्री विजयकुमारसिन्हाः विभागीय-अधिकारिभिः सह उर्वरक-बीज-कीटनाशकानां उपलब्धतायाः, वितरणव्यवस्थायाः, थोक-खुदरा-स्तरेषु उर्वरकस्य आपूर्तेः, संस्थाभ्यः निर्धारित-मूल्यस्य तथा FoR (Freight on Road) व्यवस्थायाः प्रभावी-क्रियान्वयनस्य च विषये कृषक-सम्बद्धानां महत-विषयाणां उच्चस्तरीय-समीक्षामकरोत्। सः अवदत् यत् कृषकेभ्यः उत्तम-गुणवत्तायुक्तानां कृषि-सामग्रीणां प्रदायः सर्वकारस्य मुख्या प्राथमिकता अस्ति। कस्मिंश्चिदपि स्तरे अमानक-उर्वरक-बीज-कीटनाशकानां विक्रयः, अधिक-मूल्येन विक्रयः, अनियमित-वितरणम्, अमान्य-संलग्नता (टैगिंग) अथवा अन्य-प्रकारस्य कापि गम्भीरा अनियमितता प्राप्यते चेत् सम्बद्ध-थोक-खुदरा-प्रतिष्ठानानां विरुद्धं सुसंगत-धाराभिः प्राथमिकी (FIR) पञ्जीकृता भविष्यति। माननीयः कृषि मन्त्री कठोरशब्दैः प्रोक्तवान् यत् बिहारराज्यं कम्पनीनां 'चारागाह' भवितुं न दीयते। कृषकाणां हिते राज्यसर्वकारेण कापि स्वेच्छाचारिता, अनुचित-व्यापारिक-व्यवहारः अथवा वितरण व्यवस्थायाम् अनियमितता न सहिष्यते। कम्पनीभिः स्व-कार्यप्रणाल्याम् सुधारः करणीयः तथा कृषकान् प्रति राज्यस्य वितरणव्यवस्थां प्रति च स्वकीय-उत्तरदायित्वं वोढव्यम्। सः अवदत् यत् बिहारसर्वकारः FoR-व्यवस्थां भूमितले प्रभावी-रूपेण प्रवर्तयितुं भारतसर्वकारेण तथा सम्बद्ध-कम्पनीभिः सह आवश्यक-समन्वयनं स्थापयित्वा दृढ-कार्याचरणं सुनिश्चितं करिष्यति। कम्पनीभिः इयं व्यवस्था केवलासु पत्रिकास्वेव न सीमिता भवेत्, अपि तु भूमितले कार्यान्विता भवेत् येन अस्य वास्तविकः लाभः समये कृषकान् प्राप्नुयात्। माननीयः मन्त्री अकथयत् यत् उर्वरक-वितरण-व्यवस्थायां सम्बद्धाः थोक-विक्रेतारः, रैक-हैंडलर्स, सम्बद्धाः कम्पन्यः च स्व-कार्यप्रणाल्याम् सुधारं कुर्वन्तु। कृषकाणां हितानाम् उपेक्षा अथवा विभागीय-निर्देशानाम् अवहेलना कस्यामपि स्थितौ न स्वीक्रियते। पुनः पुनः अनियमिततायाः सम्मुखमागमे सम्बद्ध-प्रतिष्ठानानां उत्तरदायि-संस्थानां च विरुद्धं कठोरतमः दण्डः विधास्यते।

मन्त्री अवदत् यत् यदि कस्मिंश्चित् थोक-विक्रेत्रे कम्पनी-निर्धारित-मूल्यात् अधिकेन मूल्येन उर्वरकः दीयते, तर्हि सः थोक-विक्रेता अस्य सूचनां विभागम् यच्छेत्। कम्पनी-स्तरे अन्य-स्तरे वा अनियमितता प्राप्ता चेत् क Retaliative/कठोर-कार्रवाई भविष्यति। जिला-कृषि-अधिकारिणः स्व-स्व-मण्डलानां थोक-विक्रेतृभिः सह उपवेशनं कृत्वा उर्वरकस्य आपूर्तेः वितरणस्य च समग्राणां समस्यानां विवरणं प्राप्य विस्तृत-प्रतिवेदनं विभागाय प्रेषयिष्यन्ति। माननीय मन्त्री प्रावोचत् यत् राज्ये विविधानां उर्वरकाणां पर्याप्तः सञ्चयः उपलब्धः अस्ति। अद्यतन-स्थित्या राज्ये यूरिया ३.८२ लक्ष मी०टन, डी०ए०पी० १.३३ लक्ष मी०टन, एन०पी०के० २.४६ लक्ष मी०टन, एम०ओ०पी० ०.६७ लक्ष मी०टन तथा एस०एस०पी० १.२३ लक्ष मी०टन परिमाणेन भण्डारः अस्ति। सः प्रखण्डवारं उर्वरकस्य उप-आवंटनं क्षेत्रस्य शस्य-व्याप्तिं तथा वास्तविक-आवश्यकतां दृष्ट्वा कर्तुं समादिशत्, येन कृषकाणां मागानुसारं प्रत्येकस्मिन् क्षेत्रे समये पर्याप्त-मात्रायाम् उर्वरकः लभ्येत।

माननीयः मन्त्री अवदत् यत् उर्वरकस्य कृष्ण-विपणनस्य , सञ्चय-प्रवृत्तेः, अधिक-मूल्येन विक्रयस्य च नियन्त्रणाय निरन्तरं निरीक्षणं क्रियते। वर्षे २०२६-२७ तमे दिनांक १३.०८.२०२६ पर्यन्तम् अनियमितता-विरुद्धं ५८ उर्वरक-प्रतिष्ठानेषु प्राथमिकी दर्जकृता तथा कुल २१४ प्रतिष्ठानानां उर्वरक-प्राधिकार-पत्राणि निरस्तानि कृतानि। सः अवदत् यत् कृषकाणां हिते शीघ्रमेव गहनान्वेषणाभियानस्य प्रारम्भः भविष्यति। अस्मिन् अभियाने उर्वरक-बीज-कीटनाशकानां उपलब्धतायाः, आपूर्तेः, मूल्यस्य, वितरण-व्यवस्थायाः तथा खुदरा-स्तरं यावत् उर्वरकस्य प्राप्ति-प्रक्रियायाः पूर्णा जाँच् भविष्यति। सर्वकारस्य उद्देश्यम् अस्ति यत् कृषकः स्व-आवश्यकतानुसारं निर्धारित-उचित-मूल्येन सुलभतया उर्वरकं प्राप्नुयात्। कृषकाणां हितैः सह किमपि सन्धिः न क्रियते।



**रविः खरिडेहालः - बेङ्गलूरु।**

## "तुङ्गभद्रा जलबन्धः युवा राष्ट्रेण साक्षात्कृतः स्वप्नः"

रायलासीमा-परिसरस्य प्रदेशस्य जनानां स्वप्नाः दुर्भिक्षैः प्रेरिताः ।अयं प्रदेशः बेलारी अनन्तपुर कुडप्पः कर्नूल् च परिभाषितः अस्ति ।कृषिविशेषज्ञैः दुर्भिक्षप्रदेशस्य समाधानस्य अन्वेषणं १९२७ तमे वर्षे आरब्धम् ।दुर्भिक्षस्य निवारणार्थं विचाराः महिलाप्रतिनिधिभिः अपि प्रदत्ताः आसन्। बहुविस्तारेण योजनां कृत्वा १९४५ तमे वर्षे आधारशिला स्थापिता । शिलया मृद्या च एषः तुङ्गभद्रा जलबन्धः निर्मितः। देशस्य बृहत्तमेषु शिला-जलबन्धेषु अन्यतमम् । १८३ ०.१ मीटर् दीर्घः ४८.७ मीटर् ऊर्ध्वता च । जलाशयस्य क्षमता १३२ अस्ति । ७२ मेगावाट् जलविद्युत्सहितं प्रायः ८००००० गृहाणि सुप्रकाशितानि सन्ति । उद्यानानि, धाराः, पक्षिणः, नौकायानानि च अस्य स्थलस्य पर्यटनस्थलं कुर्वन्ति । द्रुतगतिना गादसञ्चयः प्रमुखचिन्ता अस्ति। प्रभावी गादप्रबन्धनार्थं दीर्घकालीननियोजनस्य नवीनतमप्रौद्योगिकीनां च आवश्यकता वर्तते ।

# एकविंशतिदिवसीयः ऑनलाइन-संस्कृत-सम्भाषणवर्गस्य सम्पूर्तिसमारोहः सम्पन्नः



**हिमसंस्कृतवार्ताः — सत्येन्द्रपाठकः, लखनऊ।**

लखनऊ। संस्कृतभारत्या आयोजितस्य एकविंशतिदिवसीयस्य ऑनलाइन-संस्कृत-सम्भाषणवर्गस्य सम्पूर्तिसमारोहः त्रयोदशे अगस्त्-दिनाङ्के आभासीयमाध्यमेन उत्साहपूर्वकं सम्पन्नः। जुलै-मासस्य द्वाविंशतितः आरब्धे अस्मिन् वर्गे प्रतिभागिभ्यः संस्कृतभाषां सरलतया, सहजतया, व्यवहारिकरूपेण च अधिगन्तुं तथा संस्कृते सम्भाषणस्य नियमिताभ्यासं कर्तुं प्रशिक्षणं प्रदत्तम्।
कार्यक्रमस्य शुभारम्भः प्रिन्शुक्लेन वैदिकमङ्गलाचरणेन तथा प्रिया लौकिकमङ्गलाचरणेन कृतः। ततः वर्गस्य प्रशिक्षिका शिखामिश्रा स्वागतभाषणं प्रस्तुत्य उपस्थितानाम् अतिथीनां प्रतिभागिनां च स्वागतं कृतवती। शिवामिश्रया स्वागतगीतं संस्कृतगीतं च प्रस्तुतम्।
समारोहस्य मुख्यातिथिः आदरणीयः डॉ. अनिलकुमारः, संस्कृतभारत्याः अवधप्रान्तमन्त्री, स्वीयसम्बोधने संस्कृत-सम्भाषणस्य महत्त्वं प्रतिपाद्य प्रतिभागिनः संस्कृतस्य निरन्तराभ्यासाय प्रचार-प्रसाराय च प्रेरितवान्।समारोहस्य अवसरे प्रतिभागिभिः रामांश, श्वेता तथा शुभाङ्गेन एकविंशतिदिवसीयस्य वर्गस्य स्वानुभवाः प्रस्तुताः। तैः उक्तं यत् नियमिताभ्यासेन संस्कृतभाषायां सम्भाषणस्य आत्मविश्वासः वर्धितः तथा संस्कृतभाषायाः दैनिकजीवने प्रयोगाय प्रेरणा प्राप्ता।कार्यक्रमस्य सञ्चालनं सत्येन्द्रपाठकः कृतवान्। तेन वर्गस्य गतिविधीनाम् उपलब्धीनां च उल्लेखं कुर्वता प्रतिपादितं यत् संस्कृत-सम्भाषणस्य यात्रा सम्पूर्त्या समाप्ता न भवति, अपितु अधुना तस्याः निरन्तरं दैनिकजीवने प्रयोगस्य संकल्पः करणीयः।कार्यक्रमस्य अन्ते सत्येन्द्रपाठकेन मुख्यातिथये, प्रशिक्षिकायै, सर्वेभ्यः प्रतिभागिभ्यः, प्रस्तुतिकर्तृभ्यः सहयोगिभ्यश्च कृतज्ञता ज्ञापिता। संगीतया शान्तिमन्त्रस्य पाठेन समारोहस्य समापनं सम्पन्नम्। अवसरेऽस्मिन् सर्वैः प्रतिभागिभिः संस्कृते निरन्तरं वक्तुं, पठितुं, प्रचारयितुं च संकल्पः कृतः।

# पितृ-पुत्र-संवादः

**पिता — वत्स! तव परीक्षाफलम् किम् अभवत्? उत्तीर्णः वा अनुत्तीर्णः?**
**पुत्रः — तातः! मया परीक्षायां राजाज्ञा पालिता!**
**पिता — (आश्चर्येण) का राजाज्ञा?**
**पुत्रः — 'यथापूर्वम् तिष्ठतु' इति!**





# लघ्वी माता, महान् स्वप्नः

नगरस्य मध्ये एका लघु-चाय-विपणिका आसीत्। प्रातः पञ्चवादनात् रात्रौ दशवादनपर्यन्तम् तत्र सदैव जनसम्मर्दः भवति स्म। बाष्पोद्गच्छन् चाय-रसः, तपु-पात्राणां (टिन-गिलासानाम्) ध्वनयः, जनानां वार्तालापानां प्रतिध्वनयः च सर्वत्र व्याप्ताः आसन्।
तस्याः विपणिकायाः एके कोणे प्रतिदिनम् एका लघ्वी छाया दृश्यते स्म। तस्याः नाम 'छुटकी' इति आसीत्। वयः प्रायः नव-दश-वर्षीयम्। कृशाङ्गी सा, तस्याः नेत्रयोः बुभुक्षा अपि आसीत्, धैर्यम् अपि।
एकस्मिन् हस्ते चत्वारि चाय-पात्राणि, अपरे हस्ते च द्विवर्षीयस्य अनुजस्य 'गोलू' नाम्नः भरण-पोषणस्य भारः। यदा गोलूः क्रन्दति स्म, तदा छुटकी सर्वं त्यक्त्वा धावति स्म। तम् अङ्के (गोद में) गृह्णाति स्म, पृष्ठं ताडयति स्म, उत्तरीयवस्त्रेण तस्य स्वेदं प्रमार्जयति स्म, पुनः स्मितं कृत्वा स्वकार्ये संलग्ना भवति स्म।
विपणिकायाः स्वामी (सेठ जी) तां कदापि न भर्त्सयति स्म। ग्राहकाः विस्मिताः आसन्। एकस्मिन् दिने एकेन महोद्येन पृष्टम्—
"स्वामिन्! एषा बालिका पात्राणि त्रुटयति, चाय-रसं पातयति... तथापि भवान् एतां किमर्थम् अत्र स्थापितवान्?"
स्वामिनः नेत्रे अश्रुपूर्णे अभवताम्। सः दीर्घं निश्वासं गृहीत्वा कथां श्रावितवान्—

**"एषा भिक्षां याचितुम् ना गता, स्वप्नं गृहीत्वा आगता"**

"त्रिभ्यो मासेभ्यः पूर्वस्य कथा एषा। प्रातःकाले अहं विपणिकाम् उद्घाटयन् आसम्। दृष्टवान् यत् द्वारे एषा तिष्ठति। अङ्के कनिष्ठः भ्राता। पादयोः भिन्नाः उपानहः, शरीरे मलिनानि वस्त्राणि। किन्तु पृष्ठः सर्वथा ऋजुः (सीधा) आसीत्।
सा माम् अवदत्— 'स्वामिन्! नमस्कुरुष्व। मह्यम् कार्यं रोचते।'
मया उक्तम्— 'त्वम् अतीव लघ्वी असि, किं कार्यं करिष्यसि?'
सा अवदत्— 'पात्राणि क्षालयिष्यामि, चाय-रसं परिवेषयिष्यामि। केवलम् एकं वचनम् अस्ति। यदा मम भ्राता क्रन्दिष्यति, तदा तं शान्तं कर्तुं मह्यम् पञ्च निमेषाः दीयन्ताम्।'
मया पृष्टम्— 'वेतनम् कियत् ग्रहीष्यसि?'
सा नेत्रयोः अश्रूणि निरुध्य अवदत्— 'धनानि मा यच्छतु। केवलम् समयद्वयस्य भोजनम् रात्रौ स्वपन्नाय स्थानम् च। मम भ्राता भिक्षां याचित्वा महान् मा भवतु। अहम् श्रमेण तं विद्यालयं प्रेषयितुम् इच्छामि। मम स्वप्नः अस्ति यत् एकस्मिन् दिने सः अधिकारी भवेत्, जनाः च तं 'छुटक्याः भ्राता' इति नाम्ना जानन्तु।'"
स्वामी अग्रे अवदत्— "तस्मिन् दिने अहम् अवगच्छम्। एषा दरिद्रा अस्ति, विवशा न। भग्ना अस्ति, पराजिता न। एषा पात्राणि त्रुटयितुम् शक्नोति, किन्तु कस्यापि हृदयं न।"

**सङ्घर्षस्य दिनानि**

प्रारम्भः सुकरः नासीत्। छुटक्याः हस्तात् पात्राणि पतन्ति स्म, हस्तौ दह्यतः स्म, रात्रौ निद्रायाम् अपि सा "गोलू! तूष्णीं भव" इति मन्दं भाषते स्म।
किन्तु सा पराजयं न स्वीकृतवती।
प्रातः चतुर्वादने उत्थाय भ्रातरम् स्नापयित्वा, तस्मै भोजनं दत्त्वा, पुनः विपणिकाम् अगच्छत्।
रात्रौ ग्राहकेषु गतेषु भूतले सूतलिकां प्रसार्य भ्रातरम् स्वापयित्वा स्वयं सुरक्षाम् अददात्।
जनाः उपहसन्ति स्म— "त्वत्सदृशाः शतशः आगच्छन्ति।"
छुटकी केवलं स्मितं करोति स्म— "अङ्कल! अहम् १०१-तमा अस्मि, या अत्रैव स्थास्यति।"
शनैः शनैः ग्राहकाः अपि तस्याः मुग्धाः अभवन्। कश्चित् पुरातनं पुस्तकम्, कश्चित् पुरातनानि वस्त्राणि ददाति स्म। एकः शिक्षकः प्रतिदिनम् ३० निमेषान् तां गोलूं च पाठयितुम् आगच्छति स्म।
छुटकी वदति स्म— "मह्यम् चिकित्सकः वा अभियन्ता (Engineer) न भवितव्यम्। मया केवलम् एतावत् पठितव्यम् यत् अहम् गोलू-कृते फॉर्म-पूरणं कर्तुम्, तस्य शुल्कं दातुम् च शक्नुयाम्।"

## परिवर्तनस्य प्रारम्भः

### षण्मासानन्तरम्

एकस्मिन् दिने नगरनिगमस्य अधिकारिणः चाय-रसं पातुम् आगताः। ते छुटक्याः परिश्रमं दृष्टवन्तः। तस्याः निष्ठां दृष्ट्वा ते स्वामिना सह वार्तालापम् अकुर्वन्।
अग्रिमे सप्ताहे छुटक्याः हस्ते शासकीय-विद्यालयस्य प्रवेश-पत्रम् आसीत्। गोलू-कृते बालवाटी (आंगनवाड़ी)। विपणिकायाः उपरि च एक फलकः (Board) आरोपितः— **"अत्र छुटकी कार्यं करोति। कृपया एतस्यै सम्मानं यच्छन्तु।"**
अद्य वर्षद्वयानन्तरं छुटकी १२-कक्षायाम् अस्ति। सायं ३ होराः सा विपणिकायाम् कार्यं करोति। गोलूः तृतीय-कक्षायां प्रथमं स्थानं प्राप्नोति।
यदा कश्चित् पृच्छति— "किं श्रान्ता न भवसि?"
तदा सा हसित्वा वदति— "श्रान्तिः तस्मै भवति यस्य पार्श्वे स्वप्नः न स्यात्। मम पार्श्वे तु द्वौ स्वप्नौ स्तः— एकः मम भ्राता, द्वितीयम् च मम स्वाभिमानम्।"

🙏 **शिक्षा— अस्याः कथायाः वयम् किम् शिक्षेमहि?**

१. **वयसा न, चिन्तनेन महान् भव :** यस्मिन् वयसि बालाः दूरवाणीं (Mobile) याचन्ते, तस्मिन् वयसि छुटकी उत्तरदायित्वं याचते स्म।
२. **परिश्रमः + स्वाभिमानः = भाग्यम् :** सा भिक्षां न याचितवती, अवसरं याचितवती। अवसरं च स्वयं निर्मितवती।
३. **सहायतायाः वास्तविकः अर्थः :** स्वामी तस्यै दानं न दत्तवान्। सः तस्यै कार्यम्, सम्मानं च दत्तवान्। एषा एव वास्तविकी सहायता।
४. **सङ्घर्षः एव गुरुः :** पात्राणि भग्नानि, हस्तौ दग्धौ, जनाः अहसन्... तथापि छुटकी न भग्ना। यतो हि तस्याः 'लक्ष्यम्' महद् आसीत्।

*"विपदः एतत् वक्तुम् आगच्छन्ति यत् भवान् कियत् बलवान् अस्ति। केचन जनाः विपत्स्वपि अपरेभ्यः मार्गं रचयन्ति। छुटकी तेष्वेव एका अस्ति।"*

अद्य अपि तस्याम् चाय-विपणिकायां महतः सम्मर्दः भवति। किन्तु अधुना जनाः चाय-रसेन सह एकायाः लघ्व्याः मातुः महान्तं स्वप्नम् अपि पिबन्ति।



डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

# लौकिकन्यायकोशः ( ४९ )

## चित्रिताङ्गगजम्बुन्यायः

एकदा एकः जम्बुकः स्वशरीरस्य उपरि व्याघ्रस्य इव विविधवर्णयुक्ताः रेखाः चित्रयित्वा स्वयं व्याघ्र इव अभिनयति स्म। परन्तु बाह्यवेषेण जम्बुकः व्याघ्रो भवेत् किम् ? तथैव समाजे केचन नीचाः अपि महताम् इव वेषभूषादिकं धृत्वा स्वयं महताम् अभिनयं कुर्वन्ति। परन्तु अन्तःस्थः स्वभावः तथैव वर्तते। एवं स्वभावं गोपयित्वा अन्यदिव दर्शयितुम् उद्युक्तस्य विषये अस्य न्यायस्य प्रयोगो भवति।



# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीररजः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि! अद्य मया एका अतिविचित्रा वार्ता श्रुता। राजस्थानप्रदेशे एकेन कृषकेण भूमौ गोपितं पञ्चलक्ष-रूप्यकाणां धनम् उपजीकाभिः भक्षितम्।
**नन्दिनी-** अहो कष्टम्! धनस्य रक्षणार्थं कृतः उपायः एव विनाशाय जातः। एषा वार्ता तु शोचनीया। परन्तु शृणोतु, न्यूयार्क-नगरे अवकरः अपि धनरूपेण परिणतः! तत्र काचमञ्जूषासु बद्धः उज्झित-अवकरः जनैः स्मृतिचिह्नत्वेन क्रीतः।
**काव्या-** अहो आश्चर्यम्! उज्झितस्य अवकरस्य अपि क्रयणं कृतम् इति तु अद्भुतम् एव। एतेन सह अन्यत् अपि कौतुकम् मास्कौ-नगरे वृत्तम्। तत्र ग्रन्थालये 'रोबर्ट' 'माटिल्डा' इति नामानौ द्वौ यन्त्रमानवौ परिणीतौ। तयोः कृत्रिमबुद्धिमतोः विवाहः आयोजितः।
**नन्दिनी-** अहो! यन्त्रमानवयोः विवाहः तु अतीव कौतुकवहः। अद्यतन-प्रौद्योगिकी यत्किञ्चिदपि कर्तुं समर्था अस्ति। किन्तु गगने उड्डीयमाने विमाने एका भीषणा घटना घटिता। एकस्य विमानस्य त्रिशतपादमितात् अकस्मात् अवपातात् परम् तस्य विमानचालकः मादकद्रव्यं सेवितवान् अस्ति इति परीक्षितम्।
**काव्या-** अहो घोरम्! यदा यात्रिणां प्राणाः विमानचालकस्य हस्ते भवन्ति, तदा तादृशी असावधानता न क्षन्तव्या। अस्याः घटनायाः अन्वेषणम् आरब्धम् अस्ति। अद्यतनाः वार्ताः सत्यम् एव विचित्राः आसन्।